# Tryambakeshvarashivaradhana Varnanam Rishi Gautama

# ઋષિગૌતમેન ત્ર્યમ્બકેશ્વરશિવારાધનવર્ણનમ્

## Document Information

Text title : Tryambakeshvarashivaradhana Varnanam by Gautama Rishi

File name : tryambakeshvarashivArAdhanavarNanamRRiShigautamakRRitam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 21||

Latest update : June 18, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 18, 2023

*sanskritdocuments.org*

# ઋષિગૌતમેન ત્ર્યમ્બકેશ્વરશિવારાધનવર્ણનમ્

ઈશ્વરઃ -
શ્રૃણુ દેવિ પુરા વિપ્રો ગૌતમો નામ શાઙ્કરઃ ।
મમ ભક્તવરોઽત્યન્તં સદા મલ્લિઙ્ગપૂજકઃ ॥ ૧૬॥

અહલ્યાં તાં પુરા ત્યક્ત્વા સુત્રામણા ચ પ્રધર્ષિતામ્ ।
તદ્વિયોગેન દુઃખાર્તઃ શપ્ત્વા તાં સુપ્રિયાં પ્રિયામ્ ॥ ૧૭॥

શિવક્ષેત્રાણિ પુણ્યાનિ ભ્રમંસ્તદ્દુઃખકર્શિતઃ ।
કોકામુખં ચ કેદારમોઙ્કારામરકણ્ટકમ્ ॥ ૧૮॥

કુરુક્ષેત્રં પ્રભાસં ચ પુષ્કરં વિરજં તથા ।
કાલઞ્જરં ચ બદરીં ગયાં ચૈવ પ્રયાગકમ્ ॥ ૧૯॥

હરિદ્વારમયોધ્યાં ચ પુણ્યં પિણ્ડારકં તથા ।
શ્રીગઙ્ગાસાગરં દેવિ હલસઙ્ગં મહેશ્વરિ ॥ ૨૦॥

તત્રત્યપુણ્યતીર્થેષુ પૂજ્ય લિઙ્ગાનિ ભક્તિતઃ ।
વારાણસીમપિ પ્રાપ્ય તત્ર નો નષ્ટાકિલ્બિષઃ ॥ ૨૧॥

શ્રીવિશ્વનાથં તુષ્ટાવ સ્નાત્વા ચ મણિકર્ણિકામ્ ।
બિલ્વપત્રૈઃ સમભ્યર્ચ્ય સ્નાપ્ય ગઙ્ગામ્ભસા શિવમ્ ॥ ૨૨॥

—

ગૌતમઃ -
રત્નેશ વીરેશ ત્રિલોચનેશ કેદારસઙ્ઘેશ સુમધ્યમેશ ।
શ્રીકૃત્તિવાસેશ્વર શૂલટઙ્ક શ્રીવૃદ્ધકાલેશ્વર મઙ્ગલેશ ॥ ૨૩॥

માણ્ડીશ્વરેશાનકભારભૂત કપર્દિશમ્ભો હરિન્નાદેશ ।
ક્ષેમેશ્વરેશાન સુમઙ્ગલેશ વ્યાસેશ દક્ષેશ્વર દૈવિકેશ ॥ ૨૪॥

સર્વેશ વિશ્વેશ્વરા પાહિ દીનં માં ગૌતમં દુઃખશતાભિવિષ્ટમ્ ॥ ૨૫॥

આતામ્રારુણત્વજ્જટોરુપટલીલીલાવિહઙ્ગાયિતા
ગઙ્ગાવ્યોમપથપ્રચારનિકરૈર્દેવૈસ્તરાં સંસ્તુતા ।
સ્વાત્મૌદ્ધત્યપતદ્ભુજઙ્ગકુહરે નાનાવરદ્રાવિણી
જહ્નોર્યજ્ઞસદઃપ્રચારશમની તાન્ નાગરપ્લાવિની ॥ ૨૬॥

—

ઈશ્વરઃ -
ઇત્થં સ ગૌતમો દેવિ માં વિશ્વેશં પ્રણમ્ય ચ ।
મયા ચાજ્ઞાપિતો વિપ્ર ત્ર્યમ્બકં ગચ્છ સુવ્રત ॥ ૨૭॥

તત્ર ગોદાવરીસ્નાનં સિંહયુક્તં બૃહસ્પતૌ ।
અશ્વમેધશતાત્પુણ્યં પ્રાપ્સ્યસેઽતિ મદર્ચનાત્ ॥ ૨૮॥

મત્તો વિશ્વેશ્વરાદ્ગૌરિ લબ્ધાનુજ્ઞઃ સ ગૌતમઃ ।
ત્રિયમ્બકં ગિરિં પ્રપય ત્ર્યમ્બકેશં સમર્ચયન્ ॥ ૨૯॥

બિલ્વપત્રૈર્મહાદેવિ માં તદા લિઙ્ગરૂપિણમ્ ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગો રુદ્રાક્ષકૃતભૂષણઃ ॥ ૩૦॥

પઞ્ચાગ્નિમધ્યનિરતઃ સંસારાદ્વિરતસ્તદા ।
માં ધ્યાયન્રવિબિમ્બસ્થં ત્ર્યમ્બકેશં સ ભક્તિતઃ ॥ ૩૧॥

સ્વમાનસવરોદ્બોધં દશશ્લોકૈરુદાહરત્ ॥ ૩૨॥

—

ગૌતમઃ -

રે રે માનસ મુઞ્ચ લૌલ્યમનિશં નશ્યત્સુ વિત્તાદિષુ
તન્નૈસર્ગિકમધ્યમીષુ પદયોઃ પ્રેતેશસંહન્ત્રિણઃ ।
કામાસુક્ષપણૈકદીક્ષિતલલાટેક્ષે કુરુષ્વાસ્તિ
ચેદ્ભીરાસેચન કે જટેન્દુશકલે શમ્ભોર્ગલે ચાસિતે ॥ ૩૩॥

કિં યજ્ઞેન બહુજ્ઞકર્તૃસુલભેનાયાસવિત્તાદિભિઃ
સાધ્યેનેપ્સિતભોગદાનનિપુણેનાજ્ઞાનનાશ્યેન ચ ।
શમ્ભોસ્તાણ્ડવસુન્દરં પદયુગં ભક્ત્યાભિગચ્છેત
સકૃન્મુક્તિઃ સ્યાત્સુખરૂપિણી તદવરં સર્વં સુખં માનસ ॥ ૩૪॥

ચેતઃ સંસૃતિલોલમાનવશુચં તત્રાપિ સંસાર્યસિ
શમ્ભોઃ પાદસરોરુહં સદનમસ્ત્યસ્તિ સ્વસા ભક્તિકા ।

શ્રદ્ધા તે ગૃહિણી સ પૂજનવિધિઃ પુત્રોઽસ્ત સુભ્રાતૃતા
    શાન્ત્યક્રોધદયાશમાદિષુ સુખં ભુઙ્ક્ષ્વાક્ષયં શાશ્વતમ્ ॥ ૩૫॥

શાઠ્યેર્ષ્યામદલોભમોહકરણૈઃ કિં વાઽધિકારૈર્ધનૈઃ
    કિં દરિઃ સ્વસુખૈકસાધનતયા શુશ્રૂષમાણૈઃ પતીન્ ।
છાયામાત્રફલૈરગારવલયૈઃ કિં ભૂરુહાપેક્ષયા
    સર્વં ભ્રાન્તિવિજૃમ્ભિતં હૃદય મે મુક્ત્વા શિવં ભાવય ॥ ૩૬॥

વિત્તં રિક્તજનૈકદુર્લભતમં કૃચ્છ્રેણ લબ્ધં યદિ
    ભોક્તું ન પ્રસુરેષ દુર્ગુણગણૈરાલિપ્યતે કેવલમ્ ।
મૃત્યાવાપતતિ ક્ષણાદવિદિતં તદ્વંશજર્જીયતે
    કિ તેનાસ્તિ ભજસ્વ શમ્ભુચરણાવિષ્ટાર્થદાને ચણૌ ॥ ૩૭॥

ચેતસ્ત્વં કુરુ ચિન્તનં ત્યજ શુચં સામ્પારિકીં કિં તયા
    બ્રાહ્મણ્યેન સહ સ્થિતસ્ય તવ યત્ સાધ્યં તદેવાચર ।
યત્તત્ત્વાર્થનિબોધનં શ્રુતિગિરાં તાસામનુષ્ઠાનતઃ
    સાફલ્યોદ્યમમીશ્વરાર્પણધિયા નિઃસઙ્ગતામાવહ ॥ ૩૮॥

ચેતસ્ત્વં સકલપ્રમાણપદવીદૂરેઽલ્પસારે પુનઃ
    સંસારે રમસે ત્વદેકવિદિતં સારં સમાલમ્બ્ય ચૈ ।
એતાદૃગ્યદિ શમ્ભુમેવ મજસે તત્રૈવ રાગો ભવેત્
    સૌવર્ણદ્વ્યણુકેન તોષમયતઃ પ્રાપ્તઃ સુમેરુર્યદિ ॥ ૩૯॥

ચેતો યત્પરિચિન્ત્યતે ચ ભવતા તવ પૌરુષં ચેદ્બલં
    વિઘ્નસ્તત્ર કિયાંસ્તથાપ્યધિગતં કિં વા સુખૈકોત્તરમ્ ।
યત્સાધ્યં શ્રુતિચોદિતં વ્યવસિતં નિત્યશતદ્યક્ષતં (?) (નિત્યેષ વિહ્યક્ષતં )
    તદ્ધેતૌ યદિ યત્નમદ્ય કુરુષે તચ્છાલાઘનીયં ભવેત્ ॥ ૪૦॥

બોધાદિત્યકરપ્રસારવિરહાદમ્લાનરાગચ્છદૈ સચ્છાયાં
    વિષયાખ્યકન્દજનિતાં પ્રેમામ્બુપુરાર્દ્રિતામ્ ।
સ્વસ્થિત્યા મૃતિદાયિનીમપિ ફલભ્રાન્ત્યાજ્ઞસમ્માનિતાં
    આશાખ્યાં વિષવલ્લરીં ત્યજ મનઃ તન્મુક્તિબીજં તવ ॥ ૪૧॥

રે રે માનસરાજહંસ નિતરાં શમ્ભોઃ પદાબ્ધેસ્તટે
    ભક્ત્યા ચઞ્ચુપુટેન સાધુવિલસન્મુક્તાવલી ગૃહ્યતામ્ ।
તેન ત્વં ભવિતા જરાદિરહિતો રોગાદિહીનઃ સુખં
    ગચ્છોડ્ડીય દિવાનિશં દ્વિજકુલૈર્જુષ્ટં મહેશાલયમ્ ॥ ૪૨॥

—

સૂતઃ -
સ ઇત્થં ચેતસોદ્બોધં કૃત્વા પલ્લકનન્દનઃ ।
ગૌતમઃ પૂજયામાસ બિલ્વૈર્ગોદાવરીજલૈઃ ॥ ૪૩॥

તતઃ કાલેન મહતા તદ્દૃષ્ટિપથમાગતઃ ॥ ૪૪॥

રૈક્કાદ્યૈર્મુનિભિર્વૃતઃ સ ભગવાનારુહ્ય સચ્છાક્કરં
    હિક્કારોગગણાન્વિતાન્તકહરસ્તત્રાયયૌ ગૌતમમ્ ।
દૃષ્ટ્યા સાધુ સુધાર્દ્રયા કરુણયા પશ્યંસ્તદીયં
    વપુર્ભસ્માક્ષાદિસમન્વિતં ચ તપસા કાર્શ્યં ગતઃ શઙ્કરઃ ॥ ૪૫॥

ઈશ્વરઃ -
દૃષ્ટ્વા મામમ્બિકાયુક્તં નીલકણ્ઠં ત્રિશૂલિનમ્ ।
સન્તુષ્ટાવાષ્ટમૂર્તિં માં ગૌતમો હૃષ્ટધીસ્તદા ॥ ૪૬॥

—

ગૌતમઃ -
કરધૃતમૃગબાલં ભક્તચિત્તાનુકૂલં શ્રિતજનસુરસાલં હસ્તવર્યૈકશૂલમ્ ।
ગલલસદહિમાલં નેત્રસંશોભિભાલં શ્રિતસુરતરુમૂલં તં ભજે કાલકાલમ્ ॥ ૪૭॥

શ્રેયાંસિ સન્દિશતિ પાપમપાકરોતિ બુદ્ધિં પ્રસાદયતિ સૌખ્યતતિં તનોતિ ।
દુઃખં વિનાશયતિ શઙ્કરપાદપદ્મસમ્પૂજનં જનમિમં સફલીકરોતિ ॥ ૪૮॥

વિનિહતનરસિંહ ચર્મચેલાજકપાલોદ્ધૃત વિષ્ણુરક્તપાનલોલ ।
ધૃતચન્દ્રકલાનલાક્ષિફાલ કૃતહાલાહલ પાનતો ગલેન્દ્રનીલ ॥ ૪૯॥

કુરઙ્ગેલ્લાસત્પાણિ પદ્મામલાઙ્ગમ્ફુરદ્ભોગિમાલાવૃતાશાદિચેલ ।
મહાશૂલહસ્તાખિલાણ્ડાદિલોલ બલાક્લૃપ્તસ્વાભ્યઙ્ગબાલૈકપાલ ॥ ૫૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે ઋષિગૌતમેન ત્ર્યમ્બકેશ્વરશિવારાધનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૨૧॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 21..

Notes:

Shiva narrates to Gauri, the story of Rishi Gautam, who worshipped Him at several Shiva Kshetra-s including some of the Jyotirlingas in order to find relief from the distress that he underwent after cursing his wife Ahalya. At Varanasi, where he worshipped Vishwanatha, Shiva advised him to go to Tryambakeshwara and worship Him at Tryambaka Giri. Rishi Gautama follows Shiva's advise and does the needful.

The shloka numbers are maintained per the source text.

Proofread by Ruma Dewan

---

*Tryambakeshvarashivaradhana Varnanam Rishi Gautama*
pdf was typeset on June 18, 2023

Please send corrections to *sanskrit@cheerful.com*